One Year PG in

Vastu Shastram

अधिगमपरिणाम-आधारितपाठ्यचर्यारूपरेखा

स्नातकोत्तरकार्यक्रमः - वास्तुशास्त्रम्

2025

ज्ञान-विज्ञान विमुक्तये

UGC

विश्वविद्यालय-अनुदान-आयोगः

बहादुरशाह-जफर-मार्गः

नवदेहली – 110002

Curriculum Development Committee for One year PG (Vastu Shastram)

Prof. Deviprasad Tripathi

Chairperson of the Committee and Professor, Shri Lal Bahadur Shastri National Sanskrit University, New Delhi 🖂 devi@slbsrsv.ac.in

Prof. P.S.N. RAO

Professor, School of Planning & Architecture, New Delhi, 🖂 drpsnrao@hotmail.com

Prof. Ashok Thapaliyal

Professor, Shri Lal Bahadur Shastri National Sanskrit University, New Delhi,

🖂 ashokthapliyal@slbsrsv.ac.in

Dr. Pravesh vyas

Asst. Professor, Shri Lal Bahadur Shastri National Sanskrit University, New Delhi,

🖂 pravesh@slbsrsv.ac.in

Prof. Dinakar Marathe

Convenor of the committee and Professor, Kavikulguru Kalidas Sanskrit University, Ratnagiri Campus, Ratnagiri, Maharashtra – 415612 🖂 dinkarmarathe@gmail.com

विषयसूची

कार्यक्रमस्य परिचयः

(Introduction of the Program)

स्नातकोत्तरपाठ्यक्रमः एकवर्षस्य वर्तते। अस्मिन् कार्यक्रमे सत्रार्धद्वयं भविष्यति।

अर्हता - चतुःवर्षात्मकस्य स्नातकपाठ्यक्रमस्य परीक्षोत्तीर्णाः छात्राः अस्मिन् वास्तुशास्त्रपाठ्यक्रमे प्रवेष्टुमर्हाः भविष्यन्ति। अत्र स्वशास्त्रीयविषयाः (प्रधानपाठ्यक्रमाः - Major Course), (चितस्वशास्त्रविषयाश्च - DSE) विद्यन्ते।

कार्यक्रमस्य उद्देश्यानि

(Program Objectives)

अस्य कार्यक्रमस्य मुख्योद्देश्यानि सन्ति -

1. भारतीयज्ञानपरम्पराधारेण वास्तुशास्त्रस्य परिचयप्रदानम्।
2. भारतीयवास्तुशास्त्रस्य परम्परायाः च ज्ञानप्रदानम्।
3. भारतीयस्थापत्यकलायाः ऐतिहासिकपरिचयप्रदानम्।
4. भारतीयवास्तुशास्त्रस्य प्राचीनमानकग्रन्थानामाधारेण विशिष्टं ज्ञानप्रदानम्।
5. गृह-ग्राम-नगरादीनां सिद्धान्तानामनुशीलनात्मकं ज्ञानप्रदानम्।
6. राजगृह-देवप्रासाद-प्रतिमादीनां निर्माणसिद्धान्तानां विमर्शात्मकज्ञानप्रदानम्।
7. अर्वाचीनवास्तुकलायाः प्रमुखसिद्धान्तानां परिचयप्रदानम्।
8. कुण्डली-पञ्चाङ्ग-होराशास्त्र-आधुनिकवास्तुकलादीनां कौशलाभिवर्धनदृष्ट्या ज्ञानप्रदानम्।
9. अर्वाचीनवास्तुकलया सह प्राचीनवास्तुशास्त्रस्य प्रामाणिकं ज्ञानप्रदानम्।
10. नूतनपद्धत्याः समवायेन शास्त्रपरम्परायाः संरक्षणं प्रसारणञ्च

कार्यक्रमस्य परिणामाः

(Program Outcomes)

अस्य कार्यक्रमस्य मुख्यपरिणामाः सन्ति -

1. भारतीयस्थापत्यकलाया ऐतिहासिकं विवरणं सम्यक् ज्ञातुं समर्थाः भविष्यन्ति।
2. विभिन्नमानकग्रन्थानुसारेण मानलक्षण-भूपरिग्रहण-शल्यविमर्श-अहिबलचक्रादीन् सिद्धान्तान् विज्ञाय व्यावहारिकप्रयोगे प्रवीणाः भविष्यन्ति।
3. वास्तुनि शकुनविचारं विभिन्नमानकग्रन्थानुसारेण विविच्य चिन्तने क्षमाः भविष्यन्ति।
4. वास्तुशास्त्रस्य प्रसिद्धमानकग्रन्थानामाधारेण वास्तुयोजना-वास्तुविन्यास-पुरुषाङ्गदेवता-निघण्ट्वादिनिर्णयं विश्लेष्य कार्यक्षेत्रे प्रस्तोतुं दक्षाः भविष्यन्ति।
5. ग्रामलक्षणं खेटादिलक्षणं जलाशयादिलक्षणञ्चेति विषयान् विविधमानकग्रन्थानामाधारेण विमृष्य प्रस्तोतुं समर्थाः भविष्यन्ति।
6. पुर-नगर-दुर्ग-प्रासादादीनां लक्षणानि विज्ञाय तेषां सम्यक्प्रयोगे कुशलाः भविष्यन्ति।
7. विविधमानकग्रन्थानाधारीकृत्य देवालयवास्तुनि विविधाङ्गानां मानादिचिन्तनं परिज्ञाय व्यवहारे प्रस्तोतुं निपुणाः भविष्यन्ति।
8. विविधमानकग्रन्थानाधृत्य नृपप्रासादे विभिन्नशालानां वस्तूनाञ्च स्वरूपादिकथनं विज्ञाय विश्लेषणे प्रवीणाः भविष्यन्ति।
9. प्रतिमानां स्वरूपं लक्षणमनुप्रयोगाश्चेति ज्ञात्वा व्यवहारे प्रस्तौतुं निपुणाः भविष्यन्ति।
10. अर्वाचीनवास्तुकलायाः प्राचीनसिद्धान्ता उपस्करणानि अनुप्रयोगाश्चेत्यधीत्य वास्तुशास्त्रीयसिद्धान्तैः सह विमृष्टुं समर्थाः भविष्यन्ति।
11. कुण्डली-पञ्चाङ्ग-होराशास्त्र-अर्वाचीनवास्तुकलादीनां परिचयपुरस्सरं कौशलाभिवर्धनदृष्ट्या व्यवहारे प्रयोक्तुं कुशलाः भविष्यन्ति।

प्रधानानां पाठ्यक्रमाणां कार्यक्रमपरिणामैः सह योजनम्

(PROGRAM OUTCOME MAPPING FOR MAJOR COURSES)

Course Name पाठ्यक्रमनाम	Rootedness भारतीय मूलानि	IKS भारतीय ज्ञान परम्परा	Futuristic भविष्य वादी	Employability वृत्तिप्रदान क्षमता	Value, Skill and Multidisciplinary मूल्यानि, कौशलानि एवं बहुशास्त्रीयपाठ्यक्रमः	Disciplinary Knowledge अध्ययन शाखायाः ज्ञानम्	Difficulty Level काठिन्यस्तरः
भारतीयस्थापत्यकलायाः संक्षिप्तेतिहासः	✓	✓	✓	✓	✓	✓	✓
मानलक्षणं, भूपरिग्रहणं, शल्यविमर्शः अहिबलचक्रञ्च	✓	✓	✓	✓	✓	✓	✓
अर्वाचीनवास्तुकलायाः प्राचीनसिद्धान्ता उपस्करणानि	✓	✓	✓	✓	✓	✓	✓
वास्तुयोजना, वास्तुविन्यासः, पुरुषाङ्गदेवता-निघण्ट्वादिनिर्णयश्च	✓	✓	✓	✓	✓	✓	✓
ग्रामलक्षणं खेटादिलक्षणं जलाशयादिलक्षणञ्च	✓	✓	✓	✓	✓	✓	✓
पुरनगरलक्षणं दुर्गलक्षणं प्रासादलक्षणञ्च	✓	✓	✓	✓	✓	✓	✓
देवालयवास्तुनि विविधाङ्गानां मानादिचिन्तनम्	✓	✓	✓	✓	✓	✓	✓
नृपप्रासादे विभिन्नशालानां वस्तूनाञ्च स्वरूपादिकथनम्	✓	✓	✓	✓	✓	✓	✓

चितस्वशास्त्रविषयकपाठ्यक्रमाणां कार्यक्रमपरिणामैः सह योजनम्

(PROGRAM OUTCOME MAPPING FOR DSE COURSES)

Course Name पाठ्यक्रमनाम	Rootedness भारतीयमूलानि	IKS भारतीय ज्ञान परम्परा	Futuristic भविष्यवादी	Employability वृत्तिप्रदान क्षमता	Value, Skill and Multidisciplinary मूल्यानि, कौशलानि एवं बहुशास्त्रीय पाठ्यक्रमः	Disciplinary Knowledge अध्ययनशाखायाः ज्ञानम्	Difficulty Level कठिनतायाः स्तरः
प्रतिमानां स्वरूपं लक्षणमनुप्रयोगाश्च	✓	✓	✓	✓	✓	✓	✓
अर्वाचीनवास्तुकलायाः परिचयः विकासः परम्परा च	✓	✓	✓	✓	✓	✓	✓
होराशास्त्रसिद्धान्ताः	✓	✓	✓	✓	✓	✓	✓
वास्तुनि शकुनविचारः	✓	✓	✓	✓	✓	✓	✓
पञ्चाङ्गविज्ञानम्	✓	✓	✓	✓	✓	✓	✓
कुण्डलीनिर्माणम्	✓	✓	✓	✓	✓	✓	✓

प्रधानपाठ्यक्रमाणां सञ्चयः

क्र.सं.		पाठ्यक्रमाः	पाठ्यक्रम-श्रेयोऽङ्कः	पाठ्यक्रम-काठिन्यस्तरः
1	प्रथमसत्रार्द्धस्य प्रधानपाठ्यक्रमाः	प्रधानः 1.1: भारतीयस्थापत्यकलायाः संक्षिप्तेतिहासः	4	600-699
2		प्रधानः 1.2: मानलक्षणं, भूपरिग्रहणं, शल्यविमर्शः अहिबलचक्रञ्च	4	600-699
3		प्रधानः 1.3: अर्वाचीनवास्तुकलायाः प्राचीनसिद्धान्ता उपस्करणानि	4	600-699
4		प्रधानः 1.4: वास्तुयोजना, वास्तुविन्यासः, पुरुषाङ्गदेवता-निघण्ट्वादिनिर्णयश्च	4	600-699
5	द्वितीयसत्रार्द्धस्य प्रधानपाठ्यक्रमाः	प्रधानः 2.1: ग्रामलक्षणं खेटादिलक्षणं जलाशयादिलक्षणञ्च	4	600-699
6		प्रधानः 2.2: पुरनगरलक्षणं दुर्गलक्षणं प्रासादलक्षणञ्च	4	600-699
7		प्रधानः 2.3: देवालयवास्तुनि विविधाङ्गानां मानादिचिन्तनम्	4	600-699
8		प्रधानः 2.4: नृपप्रासादे विभिन्नशालानां वस्तूनाञ्च स्वरूपादिकथनम्	4	600-699

चितस्वशास्त्रविषयकपाठ्यक्रमाणां सञ्चयः

क्र.सं.		पाठ्यक्रमाः	पाठ्यक्रम-श्रेयोऽङ्कः	पाठ्यक्रम-काठिन्यस्तरः
1	प्रथमसत्रार्द्धस्य चितस्वशास्त्रविषयक-पाठ्यकमाः	चितस्वशास्त्रविषयः 1.क.1: प्रतिमानां स्वरूपं लक्षणमनुप्रयोगाश्च	4	600-699
2		चितस्वशास्त्रविषयः 1.क.2: अर्वाचीनवास्तुकलायाः परिचयः विकासः परम्परा च	4	600-699
3		चितस्वशास्त्रविषयः 1.क.3: होराशास्त्रसिद्धान्ताः	4	600-699
4	द्वितीयसत्रार्द्धस्य चितस्वशास्त्रविषयक-पाठ्यकमाः	चितस्वशास्त्रविषयः 2.क.1: वास्तुनि शकुनविचारः	4	600-699
5		चितस्वशास्त्रविषयः 2.क.2: पञ्चाङ्गविज्ञानम्	4	600-699
6		चितस्वशास्त्रविषयः 2.क.3: कुण्डलीनिर्माणम्	4	600-699

प्रधानपाठ्यक्रमाः

काठिन्यस्तरः 600-699	श्रेयोऽङ्का: - 4 होरा: - 60

प्रथमसत्रार्द्धः (Semester - 1)

प्रधानः पाठ्यक्रमः (Major) 1.1: भारतीयस्थापत्यकलायाः संक्षिप्तेतिहासः

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. वेदपुराणादिषु स्थापत्यविमर्शस्य तत्त्वज्ञानावगमनम्।
2. प्राचीनभारतीयस्थापत्यस्य विकासक्रमस्य विशेषज्ञानसम्पादनम्।
3. संस्कृतसाहित्ये स्थापत्यचिन्तनस्य स्वरूपज्ञानस्य विकासक्रमस्य च अवबोधनम्।
4. स्वातन्त्र्योत्तरस्थापत्यपरम्परायाः नवीनप्रवृत्तीनामवबोधनम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. वेदपुराणादिषु स्थापत्यविमर्शस्य तत्त्वानि वर्णयितुं शक्ष्यन्ति।
2. प्राचीनभारतीयस्थापत्यस्य विकासक्रमं वक्तुं प्रभविष्यन्ति।
3. संस्कृतसाहित्ये स्थापत्यचिन्तनस्य स्वरूपज्ञानस्य विकासक्रमस्य च वर्णने समर्थाः भविष्यन्ति।
4. स्वातन्त्र्योत्तरस्थापत्यपरम्परायाः नवीनप्रवृत्तीनां वर्णनं कर्तुं शक्ष्यन्ति।

श्रेयोङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
प्रधानः पाठ्यक्रमः (Major) 1.1	भारतीयस्थापत्यकलायाः संक्षिप्तेतिहासः	03	01	0	4

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. वैदिकवाङ्मये स्थापत्यशास्त्रस्य सङ्ल्पना। **श्रेयोऽङ्कः १**

- वैदिकवाङ्मये स्थापत्यशास्त्रस्य सङ्ल्पना।
- पुराणेषु स्थापत्यस्य स्वरूपम्।
- रामायणे स्थापत्यविमर्शः।
- महाभारते स्थापत्यस्य परिचर्चा।
- सिन्धु-सरस्वतीतटवर्तिसभ्यतायाः स्थापत्यकला।

अन्वितिः २. मौर्य-शुङ्ग-सातवाहनकालीनस्थापत्यम्। **श्रेयोऽङ्कः १**

- मौर्य-शुङ्ग-सातवाहनकालीनस्थापत्यम्।
- गुप्तकालीनस्थापत्यविमर्शः।

- राजपूतकालीनस्थापत्यकलायाः वैशिष्ट्यम्।
- मध्यकालीनस्थापत्यम्।
- मुगल-आंग्लस्थापत्यकलयोरुपरि भारतीयवास्तुशास्त्रस्य प्रभावः।

अन्वितिः ३. स्थापत्यस्य प्रवर्तकाः। **श्रेयोऽङ्कः १**

- संस्कृतसाहित्ये स्थापत्यचर्चा।
- स्थापत्यस्य प्रवर्तकाः।
- स्थापत्यशास्त्रस्य प्रमुखग्रन्थानां सङ्क्षिप्तपरिचयः।
- स्थापत्यशास्त्रस्य प्रमुखाः ग्रन्थकाराः।
- स्वातन्त्र्योत्तरे स्थापत्यस्य स्थितिः।

अन्वितिः ४. अनुशिक्षणम् आन्तरिकमूल्याङ्कनञ्च। **श्रेयोऽङ्कः १**

- अनुशिक्षणम् आन्तरिकमूल्याङ्कनञ्च।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. विद्याधर, डॉ., *भारतीय वास्तुशास्त्र का इतिहास*, दिल्ली : ईस्टर्न बुक लिंकर्स।
2. बाजपेयी, श्री कृष्णदत्त, *भारतीय वास्तुकला का इतिहास*, लखनऊ : हिन्दी समिति, हिन्दी भवन, महात्मा गाँधी मार्ग।

सहायकाः ग्रन्थाः (Additional Readings)

1. गुप्त, डॉ. परमेश्वरीलाल, (1989), *भारतीय वास्तुकला*, विश्वविद्यालय प्रकाशन।
2. भारद्वाज, डॉ. चन्द्रशेखर, *भारतीय वास्तुकला का इतिहास*, दिल्ली : विश्वभारती पब्लिकेशन्स।
3. गोस्वामी, डॉ. राकेश, *भारतीय मूर्तिकला एवं वास्तुकला का इतिहास*, प्रयागराज : गोस्वामी पब्लिकेशन्स एण्ड डिस्ट्रीब्यूटर्स।
4. थपलियाल, डॉ. अशोक, *वास्तुप्रवोधिनी*, नई दिल्ली : अमरग्रन्थ पब्लिकेशन्स।
5. चतुर्वेदी, प्रो. शुकदेव, *भारतीयवास्तुशास्त्र*, नवदेहली : श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः।
6. वास्तुशास्त्रविभागः, *वास्तुशास्त्रविमर्श शोधपत्रिका*, नवदेहली : श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः।

काठिन्यस्तरः 600-699	श्रेयोऽङ्काः - 4 होराः - 60

प्रधानः पाठ्यक्रमः (Major) 1.2: मानलक्षणं, भूपरिग्रहणं, शल्यविमर्शः अहिबलचक्रञ्च

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. प्राचीनस्थापत्यग्रन्थोक्तमानोपकरणानां सम्यगवगमनम्।
2. भूपरीक्षाविधेः सम्यग् अवगमनम्।
3. शल्यनिर्णयस्य मूलतत्त्वानाम् अवबोधनम्।
4. अहिबलचक्रस्य प्राचीनग्रन्थोक्तस्वरूपज्ञानप्रदानम्।
5. मान-भूमि-शल्य-अहिबलचक्रसङ्कल्पनानां सम्यगवगमनम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. मानोपकरणानां प्रामाणिकग्रन्थोक्ततत्त्वानां विश्लेषणं कर्तुं समर्थाः भविष्यन्ति।
2. भूपरीक्षाविधानं कर्तुं समर्थाः भविष्यन्ति।
3. विविधग्रन्थेषु निरुपितशल्यनिर्णयप्रक्रियायाः तुलनां कर्तुं शक्ष्यन्ति।
4. प्राचीनग्रन्थानाम् आधारेण अहिबलचक्रस्य विश्लेषणं कर्तुं समर्थाः भविष्यन्ति।
5. मान-भूमि-शल्य-चक्रविषयकं प्राचीनस्थापत्यज्ञानस्य आधुनिकदृष्ट्या प्रयोगात्मकं निरूपणं करिष्यन्ति।

श्रेयोङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
प्रधानः पाठ्यक्रमः (Major) 1.2	मानलक्षणं, भूपरिग्रहणं, शल्यविमर्शः अहिबलचक्रञ्च	03	01	0	4

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. मानविचारः। **श्रेयोऽङ्कः १**

- मानोपकरणम् (मयमतम्, 05 अध्यायः)
- हस्तकम्बीप्रमाणम् (अपराजितपृच्छा, 41 सूत्रम्)
- हस्तप्रमाणं भेदाश्च (राजवल्लभवास्तुशास्त्रम्, 01 अध्यायः, 33-40 श्लोकाः)
- हस्तलक्षणम् (समराङ्गणसूत्रधारः, 09 अध्यायः)
- शिल्पमानम् (विश्वकर्मप्रकाशः, 04 अध्यायः, 24-43 श्लोकाः)
- मानसाधनम् (वास्तुविद्या, 01 अध्याय, 03-11 श्लोकाः)

- मानोपकरणविधिः (कामिकागमः, षोडशोऽध्यायः)

अन्वितिः २. भूपरीक्षाविचारः। **श्रेयोऽङ्कः १**

- भूपरीक्षाग्रहकीलकरोपणम् (अपराजितपृच्छा, 51 सूत्रम्)
- भूपरीक्षा (समराङ्गणसूत्रधारः, 08 अध्यायः)
- भूपरीक्षाकथनम् (विश्वकर्मवास्तुशास्त्रम्, 05 अध्यायः)
- भूपरीक्षा (मयमतम्, 03 अध्यायः)
- वासयोग्या भूमिः (विश्वकर्मप्रकाशः, 01 अध्यायः, 24-73 श्लोकाः)

अन्वितिः ३. शल्यनिर्णयः अहिबलचक्रविचारश्च। **श्रेयोऽङ्कः १**

- शल्यनिर्णयाध्यायः (विश्वकर्मप्रकाशः, 12 अध्यायः, 01-37 श्लोकाः)
- प्रश्नाच्छल्यविचारः (राजवल्लभवास्तुशास्त्रम्, 01 अध्यायः, 19-21 श्लोकाः)
- शल्यविचारः (वास्तुसारः, भूमिपरीक्षणप्रकरणम्, 52-60 श्लोकाः)
- अहिबलचक्रम् (अपराजितापृच्छा, सूत्रम् -51, 43-49 श्लोकाः)
- अहिबलचक्रम् (वास्तुमण्डनम्, प्रथमोऽध्यायः, 155-170 श्लोकाः)
- अहिबलचक्रम् (नरपतिजयचर्या, चक्राध्यायः, 675-701 श्लोकाः)

अन्वितिः ४. अनुशिक्षणम् आन्तरिकमूल्याङ्कनञ्च। **श्रेयोऽङ्कः १**

- अनुशिक्षणम् आन्तरिकमूल्याङ्कनञ्च।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. पाण्डेय, डॉ. शैलजा (सम्पा.), *मयमतम्*, वाराणसी : चौखम्बा सुरभारती प्रकाशन।
2. जुगनू, श्रीकृष्ण एवं शर्मा, प्रो. भँवर (सम्पा.), *अपराजितपृच्छा*, दिल्ली : परिमल पब्लिकेशन्स।
3. जुगनू, श्रीकृष्ण (सम्पा.), *राजवल्लभवास्तुशास्त्रम्*, दिल्ली : परिमल पब्लिकेशन्स।
4. जुगनू, श्रीकृष्ण (सम्पा.), *समराङ्गणसूत्रधार*, वाराणसी : चौखम्बा संस्कृत सीरीज ऑफिस।
5. कात्यायन, महर्षि अभय (सम्पा.), *विश्वकर्मप्रकाश*, वाराणसी : चौखम्बा सुरभारती प्रकाशन।
6. जुगनू, श्रीकृष्ण (सम्पा.), *वास्तुविद्या*, वाराणसी : चौखम्बा संस्कृत सीरीज ऑफिस।
7. जुगनू, श्रीकृष्ण एवं शर्मा, प्रो. बी. एल. (सम्पा.), *विश्वकर्मवास्तुशास्त्र*, दिल्ली : परिमल पब्लिकेशन्स।
8. मिश्र, डॉ. सत्येन्द्र (सम्पा.), *नरपतिजयचर्या*, वाराणसी : चौखम्बा सुरभारती प्रकाशन।
9. त्रिपाठी, प्रो. देवीप्रसाद (सम्पा.), *वास्तुसार*, दिल्ली : ईस्टर्न बुक लिंकर्स।

10. Sabharathnam Sivacharyan, Dr. S. P. (Ed.), *कामिकागम*, Hawaii, U.S.: The Himalayan Academy, Kauai Adheenam।
11. जुगनू, श्रीकृष्ण (सम्पा.), *वास्तुमण्डन*, वाराणसी : चौखम्बा सुरभारती प्रकाशन।

सहायकाः ग्रन्थाः (Additional Readings)

1. चतुर्वेदी, प्रो. शुकदेव, *भारतीयवास्तुशास्त्र*, नवदेहली : श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः।
2. थपलियाल, डॉ. अशोक (सम्पा.), *बृहद्वास्तुमाला*, नई दिल्ली : अमरग्रन्थपब्लिकेशन्स।
3. थपलियाल, डॉ. अशोक, *वास्तुप्रवोधिनी*, नई दिल्ली : अमरग्रन्थपब्लिकेशन्स।
4. व्यास, डॉ. प्रवेश (सम्पा.), *वास्तुसौख्यम्*, जयपुर : जगदीश संस्कृत पुस्तकालय।
5. जुगनू, श्रीकृष्ण (सम्पा.), *वास्तुसारमण्डनम् आयतत्त्वञ्च*, नई दिल्ली : न्यू भारतीय बुक कॉरपोरेशन।
6. जुगनू, श्रीकृष्ण (सम्पा.), *शिल्परत्नम्*, वाराणसी : चौखम्बा सुरभारती प्रकाशन।
7. जुगनू, श्रीकृष्ण (सम्पा.), दे*वतामूर्तिप्रकरणम्*, नई दिल्ली : न्यू भारतीय बुक कॉरपोरेशन।
8. श्रीवास्तव, बलराम (सम्पा.), *रूपमण्डनम्*, नई दिल्ली : मोतीलाल बनारसीदास पब्लिकेशन्स।
9. वर्मा, डॉ. शिव (सम्पा.), *मानसार*, इन्दौर : स्थापत्यवेदशिक्षण एवं शोध संस्थान, म.प्र.।
10. वास्तुशास्त्रविभाग, *वास्तुशास्त्रविमर्श शोधपत्रिका*, नवदेहली : श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः।

काठिन्यस्तरः 600-699	श्रेयोऽङ्काः - 4 होराः - 60

प्रधानः पाठ्यक्रमः (Major) 1.3: अर्वाचीनवास्तुकलायाः प्राचीनसिद्धान्ता उपस्करणानि अनुप्रयोगाश्च

पाठ्यक्रमस्यउद्देश्यानि (Course Objectives)

1. सिन्धु-गङ्गातटीय-प्राचीनवास्तुकलायाः परिचयप्रदानम्।
2. वैदिकावासनियोजनस्य सिद्धान्तानाम् अवगमनम्।
3. भारतेविदेशे च हिन्दू-जैन-बौद्ध-ईसाई-मुस्लिम वास्तुकलानां ज्ञानम्।
4. आधुनिकवास्तुकलायाः उपस्करण-मानचित्रनिर्माण-रेखाङ्कन-त्रि-आयामीदृश्यानाम् अवबोधनम्।
5. तन्त्रयुक्तिमाध्यमेन ऑटोकेट्, जियोजेब्रा, गूगलस्केचअप् इत्यादिनां परिचयप्रदानम्।

अधिगमस्यपरिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. प्राचीनवास्तुकलायाः सभ्यता-सन्दर्भान् स्पष्टतया वक्ष्यन्ति।
2. भारतीयवास्तुकलायाः प्रकारान्देवालयविन्यासं च निरूपयिष्यन्ति।
3. आधुनिकवास्तुकलायाः उपस्करणानि, मानचित्रनिर्माणप्रविधीन् प्रतिपादयिष्यन्ति।
4. तन्त्रयुक्तिमाध्यमेन ऑटोकेट्, जियोजेब्रा, गलस्केचअप् इत्यादीनि उपकरणानि योग्यतया प्रयोक्तुं सक्षमाः भविष्यन्ति।

श्रेयोङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of theCourse)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
प्रधानः पाठ्यक्रमः (Major)1.3	अर्वाचीनवास्तुकलायाः प्राचीनसिद्धान्ता उपस्करणानि अनुप्रयोगाश्च	2	1	1	4

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १.वास्तुकलायाःप्राचीनसिद्धान्तानांपरिचयः। श्रेयोऽङ्कः १

- सिन्धुनदीतटीयसभ्यता, गङ्गानदीतटीयसभ्यता आर्यवास्तुकला च।
- वैदिकावासनियोजनस्य सिद्धान्ताः।
- चीन-यूरोप-पश्चिमैशिया-मिस्र-रोम-लैटिन-अमेरिकासभ्यतासु वास्तुकलायाः महत्त्वम्।
- भारतेविदेशे च हिन्दूजैनबौद्धवास्तुकला।
- हिन्दूजैनबौद्धदेवालयानां वास्तुकला।
- ईसाई-मुस्लिम-आराधनास्थलानां वास्तुकला।

- स्वातन्त्र्यात्परं भारतीयवास्तुकला।

अन्वितिः २. अर्वाचीनवास्तुकलायाःउपस्करणानि। **श्रेयोऽङ्कः १**

- क्षेत्रमितिः, सरलसमीकरणं, ज्यामितीयमानचित्रनिर्माणं, वास्तुरेखाङ्कनञ्च।
- प्रक्षेपणं, प्रतीकम्, अभिलेखकरणं, सम्मेलनं, रेखाणाम्मानकीकरणं, निर्माणप्रविधिः (निर्माणशैली), रङ्ग (वर्णः), प्रकाशः, छाययानुमानप्रक्रियाबाह्यान्तरसंरचना च।
- आधारभूतसंरचना, संचारसंरचना, मानकानुपातः, तालम्, आलेखाङ्कनम्, चित्रलिपिः व्यापारिकचित्राङ्कनञ्च।
- वास्तुकलाकौशलम्, वास्तुकलाप्रस्तुतीकरणप्रविधिः, त्रि-आयामीदृश्यानि च।
- विभिन्नमानकैःस्थापत्यप्रतिपादनंप्रतिरूपनिर्णयञ्च, रंगविन्यासप्रदर्शनम्, जीवनरेखाचित्रणम्, कलालेखनप्रक्रियाचित्राकलायाश्चबोधः।

अन्वितिः ३. तन्त्रयुक्तिमाध्यमेन मानचित्रनिर्माणं प्रयोगविमर्शश्च। **श्रेयोऽङ्कः १**

- ऑटोकेट तन्त्रपरिचयः।
- जियोजेब्रा तन्त्रपरिचयः।
- गूगलस्केच-अप-तन्त्रपरिचयः।

अन्वितिः४.आन्तरिक- मूल्याङ्कनम्। **श्रेयोऽङ्कः १**

- आन्तरिक-मूल्याङ्कनम्।

निर्धारिताःग्रन्थाः (Essential/Recommended Readings/Texts)

1. Wagner, Otto, Modern Architecture, (1988), Santa Monica, CA: The Getty Center for the History of Art and the Humanities.

सहायकाःग्रन्थाः (Additional Readings)

1. Shaw, E. (1854). Modern architect. Dayton and Wentworth.
2. Gangoly, O. C. (1946). Indian architecture. Kutub.
3. Ibrahim, A. Modern and contemporary architecture styles. Qassim University, Scientific Publication.
4. Robertson, H., Modern architectural design. [Publisher not specified].
5. Chaturvedi, S. Bhāratīyavāstuśāstra. Shri Lal Bahadur Shastri Rashtriya Sanskrit Vishwavidyalaya.

काठिन्यस्तरः 600-699		श्रेयोऽङ्काः - 4 होराः - 60

प्रधानः पाठ्यक्रमः (Major) 1.4: वास्तुयोजना, वास्तुविन्यासः, पुरुषाङ्गदेवता-निघण्ट्वादिनिर्णयश्च

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. राजा-मन्त्रि-सचिव-युवराज-सामन्तादीनां निवासप्रमाणज्ञानम्।
2. चातुर्वर्ण्यजनानां गृहप्रमाणस्य तथा पशुगृहप्रमाणस्यावबोधनम्।
3. शाला-वीथिका-द्वार-स्तम्भादीनां स्थापत्यप्रमाणावबोधनम्।
4. द्विशाल-त्रिशाल-चतुःशाल-पञ्चशालभवनरचनानां स्वरूपज्ञानावगमनम्।
5. वास्तुपुरुषमण्डलं, देवविन्यासः, मर्मस्थानानि इत्येषां अवगमनम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. राजकीयजनगृहप्रमाणस्य तथा सामान्यजनगृहाणां विन्यासस्य वर्णने सक्षमाः भविष्यन्ति।
2. चातुर्वर्ण्यजनानां शालालिन्द-पशुगृहप्रमाणादीनां तुलनां कर्तुं समर्थाः भविष्यन्ति।
3. द्वारनिर्णय-स्तम्भप्रकार-वीथिकाप्रमाणादीनि स्थापत्यतत्त्वानि विश्लेषयितुं समर्थाः भविष्यन्ति।
4. द्विशाल-त्रिशाल-चतुःशाल-पञ्चशालादिभवनविन्यासान् योजनायाम् अनुप्रयोक्तुं क्षमाः भविष्यन्ति।
5. वास्तुपुरुषाङ्गविन्यासः, मर्मस्थानानि, देवतासंयोजनम् इत्यादिविषयाणां वर्णने सिद्धाः भविष्यन्ति।

श्रेयोङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
प्रधानः पाठ्यक्रमः (Major) 1.4	वास्तुयोजना, वास्तुविन्यासः, पुरुषाङ्गदेवता-निघण्ट्वादिनिर्णयश्च	03	01	0	4

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. राजादिनिवासः। **श्रेयोऽङ्कः १**

- राज्ञः निवासः, मन्त्रिनिवासश्च।
- सचिवनिवासः, युवराजनिवासः सामन्तादीनां च निवासः।
- अधिकारिणां राजपुरोहितस्य च निवासः।
- सामान्यजनानां गृहप्रमाणम्।
- चातुर्वर्ण्यगृहप्रमाणं पश्वादिगृहप्रमाणञ्च।

अन्वितिः २. शालाविचारः। **श्रेयोऽङ्कः १**

- ब्राह्मणादीनां शालालिन्दयोः प्रमाणम्।
- वीथिकाप्रमाणं भवनोच्छ्रायप्रमाणञ्च।
- द्वारनिर्णयः, स्तम्भप्रकाराः, भारतुलादीनां प्रमाणम् च।
- द्विशाल-त्रिशाल-चतुःशालभवनानि।
- पञ्चादिशालभवनानि।

अन्वितिः ३. पदवास्तु। **श्रेयोऽङ्कः १**

- वास्तुपुरुषाङ्गे देवविन्यासक्रमः।
- एकाशीतिपदवास्तुमण्डलम्।
- चतुष्षष्टिपदवास्तु।
- मर्मस्थाननिर्णयः।
- वास्तुदेवतानिघण्टु।

अन्वितिः ४. अनुशिक्षणम् आन्तरिकमूल्याङ्कनञ्च। **श्रेयोऽङ्कः १**

- अनुशिक्षणम् आन्तरिकमूल्याङ्कनञ्च।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. त्रिपाठी, प्रो. देवीप्रसाद (सम्पा.), *वास्तुसार*, दिल्ली : ईस्टर्न बुक लिंकर्स।
2. जुगनू, श्रीकृष्ण (सम्पा.), *समराङ्गणसूत्रधार*, वाराणसी : चौखम्बा संस्कृत सीरीज ऑफिस।
3. जुगनू, श्रीकृष्ण (सम्पा.), *राजवल्लभवास्तुशास्त्रम्*, दिल्ली : परिमल पब्लिकेशन्स।
4. जुगनू, श्रीकृष्ण एवं शर्मा, प्रो. भँवर (सम्पा.), *अपराजितपृच्छा*, दिल्ली : परिमल पब्लिकेशन्स।

सहायकाः ग्रन्थाः (Additional Readings)

1. भारद्वाज, डॉ. चन्द्रशेखर, *भारतीय वास्तुकला का इतिहास*, दिल्ली : विश्वभारती पब्लिकेशन्स।
2. कात्यायन, महर्षि अभय (सम्पा.), *विश्वकर्मप्रकाश*, वाराणसी : चौखम्बा सुरभारती प्रकाशन।
3. जुगनू, श्रीकृष्ण (सम्पा.), *वास्तु उद्धारधोरणी*, वाराणसी : चौखम्बा कृष्णदास अकादमी।
4. चतुर्वेदी, प्रो. शुकदेव, *भारतीयवास्तुशास्त्र*, नवदेहली : श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः।
5. वास्तुशास्त्रविभाग, *वास्तुशास्त्रविमर्श शोधपत्रिका*, नवदेहली : श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः।

काठिन्यस्तरः 600-699	श्रेयोऽङ्काः - 4 होराः - 60

द्वितीयसत्रार्द्धः (Semester - 2)

प्रधानः पाठ्यक्रमः (Major) 2.1: ग्रामलक्षणं खेटादिलक्षणं जलाशयादिलक्षणञ्च

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. विविधवास्तुशास्त्रग्रन्थेषु वर्णितस्य ग्रामविन्यासस्य तथा ग्रामलक्षणस्यावबोधनम्।
2. खेटादीनां भेदाः, संज्ञाः, लक्षणानि इति एतेषां अवगमनम्।
3. वापी-कूप-तडाग-तटाकादीनां लक्षणावबोधनम्।
4. प्राचीनग्रन्थाधारेण जलाशयनिर्माणविधीनां समग्ररूपेण उपस्थापनम्।
5. ग्राम-खेट-जलाशयादीनां विन्यासप्रणालीषु स्थापनपरम्परायाः ज्ञानम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः

1. मयमत-मानसार-विश्वकर्मवास्तुशास्त्रादिषु निर्दिष्टं ग्रामविन्यासं ग्रामलक्षणं च अवगन्तुं सक्षमाः भविष्यन्ति।
2. खेटादीनां भेदान्, संज्ञाः, लक्षणानि च विभिन्नग्रन्थोक्तरूपेण तोलयितुं समर्थाः भविष्यन्ति।
3. अपराजितापृच्छा-वास्तुमण्डनादिभ्यः वापीकूपतडागादीनां लक्षणनिर्णयं विश्लेषयितुं योग्या भविष्यन्ति।
4. विश्वकर्मप्रकाशादिवर्णितान् जलाशयनिर्माणस्य प्रकारान् अनुप्रयोक्तुं क्षमाः भविष्यन्ति।
5. ग्राम-खेट-जलाशयविन्यासस्य समग्रतत्त्वानि आधुनिकयोजनासु उपयोक्तुं पारङ्गताः भविष्यन्ति।

श्रेयोङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
प्रधानः पाठ्यक्रमः (Major) 2.1	ग्रामलक्षणं खेटादिलक्षणं जलाशयादिलक्षणञ्च	03	01	0	4

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. ग्रामविन्यासः। **श्रेयोऽङ्कः १**

- ग्रामविन्यासः (मयमतम् - 09 अध्यायः)
- ग्रामलक्षणकथनम् (विश्वकर्मावास्तुशास्त्रम् - 07 अध्यायः)
- ग्रामलक्षणम् (मानसारम् - 09 अध्यायः)
- ग्रामादिविन्यासविधिः (कामिकागमः - अध्यायः 27)
- ग्रामादिलक्षणम् (शिल्परत्नम् - 05 अध्यायः)

अन्वितिः २. खेटविचारः। **श्रेयोऽङ्कः १**

- खेटादिभेदाः (मयमतम् - 10 अध्यायः, श्लोकः 26-35)
- खेटादिसञ्ज्ञाः (समराङ्गणसूत्रधारः - 18 अध्यायः, श्लोकः 1-7)
- खेटादिलक्षणकथनम् (विश्वकर्मवास्तुशास्त्रम् - 08 अध्यायः)
- खेटादिलक्षणम् (मानसारम् -10 अध्यायः, श्लोकः 19-43)
- ग्रामादिलक्षणम् (कामिकागमः - अध्यायः 20)

अन्वितिः ३. वापीलक्षणविचारः। **श्रेयोऽङ्कः १**

- वापीलक्षणं तटाकलक्षणञ्च (विश्वकर्मवास्तुशास्त्रम् - 33, अध्यायः – 34)
- जलाशयादिलक्षणम् (वास्तुमण्डनम् - अध्यायः - 03, श्लोकः 84-93)
- जलाशयादिलक्षणम् (राजवल्लभवास्तुशास्त्रम्, 04 अध्यायः, श्लोकः 26-35)
- वापीकूपतडागादिनिर्णयः (अपराजितापृच्छा - 74 सूत्रम्)
- जलाशयकरणम् (विश्वकर्मप्रकाशः, अध्यायः 08)

अन्वितिः ४. अनुशिक्षणम् आन्तरिकमूल्याङ्कनञ्च। **श्रेयोऽङ्कः १**

- अनुशिक्षणम् आन्तरिकमूल्याङ्कनञ्च।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. पाण्डेय, डॉ. शैलजा (सम्पा.), *मयमतम्*, वाराणसी : चौखम्बा सुरभारती प्रकाशन।
2. जुगनू, श्रीकृष्ण एवं शर्मा, प्रो. भँवर (सम्पा.), *अपराजितपृच्छा*, दिल्ली : परिमल पब्लिकेशन्स।
3. जुगनू, श्रीकृष्ण (सम्पा.), *राजवल्लभवास्तुशास्त्रम्*, दिल्ली : परिमल पब्लिकेशन्स।
4. जुगनू, श्रीकृष्ण (सम्पा.), *समराङ्गणसूत्रधार*, वाराणसी : चौखम्बा संस्कृत सीरीज ऑफिस।
5. कात्यायन, महर्षि अभय (सम्पा.), *विश्वकर्मप्रकाश*, वाराणसी : चौखम्बा सुरभारती प्रकाशन।
6. Sabharathnam Sivacharyan, Dr. S. P. (Ed.), *कामिकागम*, Hawaii, U.S.: The Himalayan Academy, Kauai Adheenam.
7. जुगनू, श्रीकृष्ण एवं शर्मा, प्रो. बी. एल. (सम्पा.), *विश्वकर्मवास्तुशास्त्र*, दिल्ली : परिमल पब्लिकेशन्स।
8. जुगनू, श्रीकृष्ण (सम्पा.), *वास्तुमण्डन*, वाराणसी : चौखम्बा सुरभारती प्रकाशन।
9. जुगनू, श्रीकृष्ण (सम्पा.), *शिल्परत्नम्*, वाराणसी : चौखम्बा सुरभारती प्रकाशन।
10. वर्मा, डॉ. शिव (सम्पा.), *मानसार*, इन्दौर, म.प्र. : स्थापत्यवेदशिक्षण एवं शोध संस्थान।

सहायकाः ग्रन्थाः (Additional Readings)

1. चतुर्वेदी, प्रो. शुकदेव, *भारतीयवास्तुशास्त्र*, नवदेहली : श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः।

2. थपलियाल, डॉ. अशोक (सम्पा.), *बृहद्वास्तुमाला*, नई दिल्ली : अमरग्रन्थ पब्लिकेशन्स।
3. थपलियाल, डॉ. अशोक, *वास्तुप्रवोधिनी*, नई दिल्ली : अमरग्रन्थ पब्लिकेशन्स।
4. व्यास, डॉ. प्रवेश (सम्पा.), *वास्तुसौख्यम्*, जयपुर : जगदीश संस्कृत पुस्तकालय।
5. जुगनू, श्रीकृष्ण (सम्पा.), *वास्तुसारमण्डनम् आयतत्त्वञ्च*, नई दिल्ली : न्यू भारतीय बुक कॉरपोरेशन।
6. मिश्र, डॉ. सत्येन्द्र (सम्पा.), *नरपतिजयचर्या*, वाराणसी : चौखम्बा सुरभारती प्रकाशन।
7. त्रिपाठी, प्रो. देवीप्रसाद (सम्पा.), *वास्तुसार*, दिल्ली : ईस्टर्न बुक लिंकर्स।
8. जुगनू, श्रीकृष्ण (सम्पा.), *वास्तुविद्या*, वाराणसी : चौखम्बा संस्कृत सीरीज ऑफिस।
9. वास्तुशास्त्रविभाग, *वास्तुशास्त्रविमर्श शोधपत्रिका*, नवदेहली : श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः।

काठिन्यस्तरः 600-699	श्रेयोऽङ्काः - 4 होराः - 60

प्रधानः पाठ्यक्रमः (Major) 2.2: पुरनगरलक्षणं दुर्गलक्षणं प्रासादलक्षणञ्च

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. मयमत-समराङ्गणसूत्रधार-अपराजितपृच्छादिग्रन्थेषु वर्णितस्य नगरविन्यासस्य पुरलक्षणस्यावगमनम्।
2. पद्मादिनगरलक्षणानां तथा नगर-पुर-दुर्गादिसञ्ज्ञानां अवबोधनम्।
3. दुर्गनिर्माणविधानस्य तेषां लक्षणस्य पुरादिस्वरूपस्य च प्रतिपादनम्।
4. देवप्रासाद-नागर-रुचक-मेर्वादिप्रासादानां स्थापत्यविशेषाः, शुभाशुभलक्षणानां च अवगमनम्।
5. विश्वकर्मप्रकाश-बृहत्संहिता-शिल्परत्न-समराङ्गणसूत्रधारादिग्रन्थेषु निर्दिष्टप्रासादनिर्माणविधेः समग्ररूपेण उपस्थापनम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. प्राचीनग्रन्थेषु वर्णितं नगरविन्यासं पुरलक्षणञ्च सम्यक् विवेक्तुं सक्षमाः भविष्यन्ति।
2. नगर–दुर्ग–पुरसञ्ज्ञादीनि तथा तेषां लक्षणानि विभिन्नग्रन्थोक्तरूपेण तोलयितुं समर्थाः भविष्यन्ति।
3. दुर्गाणां प्रकारान्, तेषां निर्माणविधानं, लक्षणानि च विश्लेषयितुं पारङ्गताः भविष्यन्ति।
4. देवप्रासादनागररुचकमेर्वादिषोडशप्रासादलक्षणानि स्थापत्यदृष्ट्या अवगन्तुं योग्या भविष्यन्ति।
5. बृहत्संहिता-विश्वकर्मप्रकाश-समराङ्गणसूत्रधारादिषु निर्दिष्टं प्रासादनिर्माणविधानं आधुनिकस्थापत्ये अनुप्रयोक्तुं क्षमाः भविष्यन्ति।

श्रेयोङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
प्रधानः पाठ्यक्रमः (Major) 2.2	पुरनगरलक्षणं दुर्गलक्षणं प्रासादलक्षणञ्च	03	01	0	4

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. पुर-नगरलक्षणानि। **श्रेयोऽङ्कः १**

- नगरविन्यासः (मयमतम् -10 अध्यायः, श्लोकः 51-90)
- पद्मादिनगरलक्षणनिरूपणम् (विश्वकर्मावास्तुशास्त्रम् - अध्यायः 09)
- पुरनिवेशः (समराङ्गणसूत्रधारः - अध्यायः 10)
- नगरादिसञ्ज्ञा (समराङ्गणसूत्रधारः - अध्यायः 18)
- पुरलक्षणम् (अपराजितपृच्छा - सूत्रम् 73)

अन्वितिः २. दुर्गलक्षणानि। **श्रेयोऽङ्कः १**

- नगरविधानम् (मानसारः - अध्यायः 10, श्लोकः 1-18)
- दुर्गाणि (मयमतम् 10 अध्यायः, श्लोकः 36-50)
- दुर्गपुरादिलक्षणम् (राजवल्लभवास्तुशास्त्रम् 4 अध्यायः, श्लोकः 1-20)
- दुर्गलक्षणकथनम् (विश्वकर्मवास्तुशास्त्रम् - 10 अध्यायः)
- दुर्गनिर्माणाध्यायः (विश्वकर्मप्रकाशः - अध्यायः – 11)
- दुर्गाणां लक्षणानि (शिल्परत्नम् - अध्यायः 5, श्लोकः - 11-25)

अन्वितिः ३. प्रासादलक्षणानि। **श्रेयोऽङ्कः १**

- देवप्रासादलक्षणकथनम् (विश्वकर्मवास्तुशास्त्रम्, अध्यायः – 72)
- रुचकादिप्रासादलक्षणं, प्रासादशुभाशुभलक्षणं, मेर्वादिषोडशप्रासादादिलक्षणञ्च (समराङ्गणसूत्रधारः - अध्यायः - 49, 50 51 एवं 52)
- प्रासादनिर्माणाध्यायः (विश्वकर्मप्रकाशः - अध्यायः 06)
- नागरादिप्रासादलक्षणम् (अपराजितपृच्छा - सूत्राणि 104, 105,106)
- प्रासादलक्षणम् (बृहत्संहिता - प्रासादलक्षणाध्याय - 56 अध्यायः)
- प्रासादलक्षणम् (शिल्परत्नम् - अध्यायः 16)

अन्वितिः ४. अनुशिक्षणम् आन्तरिकमूल्याङ्कनञ्च। **श्रेयोऽङ्कः १**

- अनुशिक्षणम् आन्तरिकमूल्याङ्कनञ्च।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. पाण्डेय, डॉ. शैलजा (सम्पा.), *मयमतम्*, वाराणसी : चौखम्बा सुरभारती प्रकाशन।
2. जुगनू, श्रीकृष्ण एवं शर्मा, प्रो. भँवर (सम्पा.), *अपराजितपृच्छा*, दिल्ली : परिमल पब्लिकेशन्स।
3. जुगनू, श्रीकृष्ण (सम्पा.), *राजवल्लभवास्तुशास्त्रम्*, दिल्ली : परिमल पब्लिकेशन्स।
4. जुगनू, श्रीकृष्ण (सम्पा.), *समराङ्गणसूत्रधार*, वाराणसी : चौखम्बा संस्कृत सीरीज ऑफिस।
5. कात्यायन, महर्षि अभय (सम्पा.), *विश्वकर्मप्रकाश*, वाराणसी : चौखम्बा सुरभारती प्रकाशन।
6. जुगनू, श्रीकृष्ण एवं शर्मा, प्रो. बी. एल. (सम्पा.), *विश्वकर्मवास्तुशास्त्र*, दिल्ली : परिमल पब्लिकेशन्स।
7. जुगनू, श्रीकृष्ण (सम्पा.), *शिल्परत्नम्*, वाराणसी : चौखम्बा सुरभारती प्रकाशन।
8. वर्मा, डॉ. शिव (सम्पा.), *मानसार*, इन्दौर, म.प्र. : स्थापत्यवेदशिक्षण एवं शोध संस्थान।
9. झा, अच्युतानन्द (सम्पा.), *बृहत्संहिता*, वाराणसी : चौखम्बा विद्या भवन।

सहायकाः ग्रन्थाः (Additional Readings)

1. चतुर्वेदी, प्रो. शुकदेव, *भारतीयवास्तुशास्त्र*, नवदेहली : श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः।
2. थपलियाल, डॉ. अशोक (सम्पा.), *बृहद्वास्तुमाला*, नई दिल्ली : अमरग्रन्थ पब्लिकेशन्स।
3. थपलियाल, डॉ. अशोक, *वास्तुप्रवोधिनी*, नई दिल्ली : अमरग्रन्थ पब्लिकेशन्स।
4. व्यास, डॉ. प्रवेश (सम्पा.), *वास्तुसौख्यम्*, जयपुर : जगदीश संस्कृत पुस्तकालय।
5. जुगनू, श्रीकृष्ण (सम्पा.), *वास्तुसारमण्डनम् आयतत्त्वञ्च*, नई दिल्ली : न्यू भारतीय बुक कॉरपोरेशन।
6. मिश्र, डॉ. सत्येन्द्र (सम्पा.), *नरपतिजयचर्या*, वाराणसी : चौखम्बा सुरभारती प्रकाशन।
7. त्रिपाठी, प्रो. देवीप्रसाद (सम्पा.), *वास्तुसार*, दिल्ली : ईस्टर्न बुक लिंकर्स।
8. जुगनू, श्रीकृष्ण (सम्पा.), *वास्तुविद्या*, वाराणसी : चौखम्बा संस्कृत सीरीज ऑफिस।
9. जुगनू, श्रीकृष्ण (सम्पा.), *देवतामूर्तिप्रकरणम्*, नई दिल्ली : न्यू भारतीय बुक कॉरपोरेशन।
10. श्रीवास्तव, बलराम (सम्पा.), *रूपमण्डनम्*, नई दिल्ली : मोतीलाल बनारसीदास पब्लिकेशन्स।
11. Sabharathnam Sivacharyan, Dr. S. P. (Ed.), *कामिकागम*, Hawaii, U.S.: The Himalayan Academy, Kauai Adheenam.
12. जुगनू, श्रीकृष्ण (सम्पा.), *वास्तुमण्डन*, वाराणसी : चौखम्बा सुरभारती प्रकाशन।
13. वास्तुशास्त्रविभाग, *वास्तुशास्त्रविमर्श शोधपत्रिका*, नवदेहली : श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः।

काठिन्यस्तरः 600-699	श्रेयोऽङ्काः - 4 होराः - 60

प्रधानः पाठ्यक्रमः (Major) 2.3: देवालयवास्तुनि विविधाङ्गानां मानादिचिन्तनम्

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. शास्त्रीयग्रन्थेषु वर्णितानां देवालयनिवेशनिर्माणादिलक्षणानां अवबोधनम्।
2. प्रासादमण्डनग्रन्थे निर्दिष्टानां देवालयपदार्थप्रमाणस्वरूपाणां परिचयप्रदानम्।
3. देवायतनानां संरचनात्मकतत्त्वानां तथा मण्डपादिलक्षणानाम् अवगमनम्।
4. शिखरध्वजकलशादिलक्षणनाम् अवबोधनम्।
5. जीर्णोद्धारविधेः, दोषनिवारणस्य च शास्त्रीयपद्धतेः अवगमनम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

